# श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,

# श्रीविहारः,पुरी -752003, ओडिशा ।

# नाामङ्कननियमावली

# (Prospectus)

# 2022-23

# आचार्यनामाङ्कननियमावली

## नियमावलीं ध्यानेन पठन्तु ।

## 1. विभागीयस्थानानि (Seats in the Departments)

(क) अस्य विश्वविद्यालयस्य अष्टसु स्नातकोत्तरविभागेषु आचार्य इत्युपाधिलब्धये वर्षद्वयमधिकृत्य शिक्षादानव्यवस्था वर्त्तते। तत्र वक्ष्यमाणरीत्या प्रतिविभागं स्थानसंख्या निश्चिता । यथा -

| क्रमसंख्या | विभागः | स्थानसंख्या |
|---|---|---|
| १ | अद्वैतवेदान्तः | **36** |
| २ | ज्योतिर्विज्ञानम् | **24** |
| ३ | धर्मशास्त्रम् | **36** |
| ४ | न्यायः | **36** |
| ५ | वेदः | **24** |
| ६ | व्याकरणम् | **36** |
| ७ | सर्वदर्शनम् | **36** |
| ८ | साहित्यम् | **44** |
| | | --------- |
| | | **272** |

(ख) विश्वविद्यालयः स्वविचारेण प्रतिविभागं स्थानसंख्यां परिवर्त्तयितुमर्हति ।

## 2. प्रवेशार्हता (Eligibility)

(क) अस्य विश्वविद्यालयस्य अथवा एतद्विश्वविद्यालयमान्यताप्राप्तानामन्येषां विश्वविद्यालयानामनुष्ठानानां वा शास्त्रिपरीक्षायां संस्कृतसहितपरीक्षायां वा संस्कृतविषयोत्तीर्णपत्रेषु (**Pass/Elective**) साकल्येन न्यूनातिन्यूनतया प्रतिशतं चत्वारिंशदङ्कान् (**40%**) अथवा संस्कृतविषयकसम्मानपत्रेषु (**Hons. Papers**) साकल्येन न्यूनातिन्यूनतया प्रतिशतं चत्वारिंशदङ्कान् (**40%**) लब्धवन्तः/लब्धवत्यः एतद्विश्वविद्यालयीय - प्रवेशपरीक्षामुत्तीर्य उपर्युक्तानामन्यतमे विभागे प्रवेशार्हा भवन्ति।

(ख) अस्य विश्वविद्यालयस्य द्विवर्षीयपुरातनशास्त्रिपरीक्षामुत्तीर्णाः आचार्यपरीक्षाप्रविध्यनुसारं "नूतनाचार्यपरीक्षायामनुप्रवेशनात्प्राक् आङ्गलोपाख्याऽर्जनद्वारा परीक्षायामुपवेशनार्हतामवश्यं स्वीकरिष्ये" इति विभागप्रवेशसमये एकेन शपथपत्रेण घोषयित्वा अस्मिन् पाठ्यक्रमे प्रवेष्टुमर्हन्ति ।

(ग) पुनश्च द्विवर्षीयपुरातनशास्त्रिपरीक्षामुत्तीर्णाः एकेन पृथक्शपथपत्रेण एतद्घोषयेयुः यत् "आङ्ग्लोपाख्यया सह नूतनाचार्यपरीक्षायां कृतकार्या एव नूतनाचार्यप्रमाणपत्रं लब्धुमर्हाम" इति ।

## 3. आवेदनप्रणाली (Mode of Application)

(क) अस्य विश्वविद्यालयस्य अन्तर्जालसंकेततः (www.sjsv.nic.in) छात्रः/छात्रा आवेदनपत्रं प्राप्स्यति। तत् सर्वं पूरयित्वा केवलं पत्रालयमाध्यमेन (**Regd./Speed Post** द्वारा) अध्यक्षः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः, पुरी-७५२००३, ओडिशा (**Chairman, Shri Jagannath Sanskrit Vishvavidyalaya, Shri Vihar, Puri, 752003, Odisha**) नाम्ना प्रेषयिष्यति ।

(ख) **आवेदनपत्रपूरणार्थम् अर्थराशिः (Application fees)-**

आवेदनपत्रपूरणसमये छात्रः/छात्रा अष्टशतरूप्यकाणि(**800/-**)आवेदनपत्रनिमित्तं दाष्यति. एतत् **Online** इति द्वारा **University Gateway** इति माध्यमेन प्रदाष्यति। धनप्रदानात् परं प्राप्तिस्वीकार्यपत्रम् (**Fee receipt**)आवेदनपत्रेण सह प्रेषयिष्यति।इदं मनसि ध्येयं एकस्य एकाधिकस्य वा विभागस्य कृते अष्टशतरूप्यकाणि(**800/-**) आवेदनपत्रमूल्यरूपेण देयानि।

(ग) एकाधिकविषयेषु आवेदयितुम् अभिलषन्तः/त्यः छात्राः आवेदनपत्रे निर्दिष्टे स्थाने स्वस्य अभीप्सानुसारं विषयक्रमम् उल्लिखेयुः। (Applicants willing to apply for more than one subject should write their ***subject preferences serially*** in the appropriate place/ Box indicated in the front page of Application Form.)

### For Example-

(i) १.वेदः, २.व्याकरणम्,३.साहित्यम्, ४. धर्मशास्त्रम् ५. न्यायः;

(ii) १.न्यायः,२.साहित्यम्, ३. अद्वैतवेदान्तः;

(iii) १.ज्योतिर्विज्ञानम्, २. धर्मशास्त्रम्,३. सर्वदर्शनम् ४. न्यायः ५. अद्वैतवेदान्तः,६. वेदः,७.साहित्यम्, ८. व्याकरणम् ।

एवं स्वस्वाभीप्सानुसारं विषयक्रमः लेखनीयः।

(घ) आवेदनपत्रग्रहणस्य अन्तिमदिवसात्परं प्राप्तानि आवेदनपत्राणि नामाङ्कनार्थं नैव विचारयिष्यन्ते।

(ङ) आवेदनपत्रग्रहणार्थमन्तिमदिवसः विश्वविद्यालयस्य अन्तर्जालमध्ये प्रकाशयिष्यते।

(च) असम्पूर्णमावेदनपत्रं विचारार्थं न स्वीक्रियते।

(छ) प्रार्थी/प्रार्थिनी वक्ष्यमाणानां प्रमाणपत्राणां सत्यापितप्रतिलिपिभिः सह आवेदनपत्रं स्वहस्ताक्षरेण पूरयित्वा प्रेषयेत् । यथा-

(i) मध्यमा/मात्रिक्, उपशास्त्री/+2, शास्त्री/+3 इति संस्कृतसहितानां परीक्षाणां लब्धाङ्कपत्राणां (Mark Sheets) सत्यापिता प्रतिलिपिः (attested xerox copies)।

(ii) मध्यमा/मात्रिक्, उपशास्त्री/+2 , शास्त्री/ +3 इति परीक्षाणां मूलप्रमाणपत्राणां (Original Certificates) सत्यापिता प्रतिलिपिः (attested xerox copies) ।

(iii) चरित्रप्रमाणपत्रस्य (Conduct Cerificate) सत्यापिता प्रतिलिपिः।

(iv) अनुसूचितजातिः/ अनुसूचितजनजातिश्चेत् (SC/ST) तद्विषयिणी सत्यापिता प्रतिलिपिः। (यदि प्रार्थी/ प्रार्थिनी एतज्जातीयः/या स्यात्)।

(v) दिव्याङ्गप्रमाणपत्रम् (Certificate of Differently-abled Candidates) (अस्ति चेत्) तस्य सत्यापिता प्रतिलिपिः योजनीया। अत्र सर्वकार्यस्य निमम: पालयिष्यते ।

(vi) आन्तर्जाति-राष्ट्रा-न्तःप्रदेशा-न्तर्विश्वविद्यालयस्तरीयक्रीडाप्रमाणपत्रं (किञ्चित् स्यात् चेत्) तस्य सत्यापिता प्रतिलिपिः।

(vii) NCC-NSS-Rover & Ranger सम्बन्धीनि प्रमाणपत्राणि सन्ति चेत् तत्प्रमाणपत्रस्य सत्यापिता प्रतिलिपिः। तत्र राज्यसर्वकारस्य नियमानुसारं गौरवं प्रदास्यते।

(viii) आवेदनपत्रं संस्कृतभाषयैव पूरणीयम्।

(ix) वर्यताक्रमः **(Merit List)** नामाङ्कनादिसम्बन्धिसूचना च विश्वविद्यालयस्य अन्तर्जालमध्ये **(www.sjsv.nic.in)** सूचयिष्येते।

# 4. प्रवेशपरीक्षा (Entrance Test)

## (क) परीक्षायोजना

- सर्वेषां स्नातकोत्तरविभागानां (अद्वैतवेदान्तः ,ज्योतिर्विज्ञानम् ,धर्मशास्त्रं, न्यायः, वेदः, व्याकरणं, सर्वदर्शनं ,साहित्यम् इति) कृते एका प्रवेशपरीक्षा भविष्यति। (There will be one Entrance Examination for all the P. G. Teaching Departments. The Departments are Advaita Vedanta, Jyotirvijnana, Dharmashatra, Nyaya, Veda, Vyakarana, Sarvadarshana and Sahitya.)
- प्रवेशपरीक्षायाः पूर्णाङ्काः १ २ ० भविष्यन्ति। (The Entrance Examination will be of 120 Marks.)
- प्रवेशपरीक्षायां १ २ ० प्रश्नाः भविष्यन्ति। (There will be 120 Questions in the Entrance Examination.)
- प्रत्येकस्मात् विभागात् पञ्चदश प्रश्नाः भविष्यन्ति। (Fifteen Questions will be asked from each subject. 15 Questions X 08 Subjects = 120 Questions.)
- शास्त्रिसम्मानसामान्यविषयान् स्नातकसंस्कृतसम्मानविषयं (संस्कृतं) चाधारीकृत्य प्रवेशपरीक्षायाः प्रश्नाः भविष्यन्ति। (The Entrance Examination will be conducted on the basis of Honours/ Pass Subjects in Shastri Course and Sanskrit Honours in +3 Course.)
- सर्वे प्रश्नाः समाधेयाः। (All the Questions are to be answered.)
- सर्वे प्रश्नाः समानाङ्काः। (Each question carries equal mark.)
- त्रुटिपूर्णस्य उत्तरस्य कृते वियोगाङ्कः नास्ति। (There will be no minus (-) marking for incorrect answer.)

- प्रवेशपरीक्षाया: काल: सार्धहोराद्वयं भविष्यति । (The Duration of the Entrance Examination will be of 'Two and Half' (2.1/2) hours.)

(ख) प्रवेशपरीक्षाया: लब्धाङ्कान् शिक्षागतयोग्यतालब्धाङ्कान् चाधारीकृत्य वर्यताक्रमेण (according to merit) तत्तद्विभागेषु नामाङ्कनं भविष्यति ।

## (ग) नामाङ्कनम् (Admission)

नामाङ्कनकाले मूलप्रमाणपत्राणि अवश्यमानीय प्रदर्शयितव्यानि। अन्यथा नामाङ्कनं न भवेत्। यथा-

(i) मध्यमा/ माट्रिक्, उपशास्त्री /+2 , शास्त्री/+3 इति परीक्षाणां मूलप्रमाणपत्राणि ।

(ii) मध्यमा/ माट्रिक्, उपशास्त्री/+2 , शास्त्री/+3 इति परीक्षाणां मूललब्धाङ्कपत्राणि ।

(iii) अन्तिमशिक्षानुष्ठानपरित्यागमूलप्रमाणपत्रम् (Original Leaving Certificate last Educational Institution) (विभागेन स्वायत्तीकरिष्यते)।

(iv) मूलचरित्रप्रमाणपत्रम् (Original Conduct Certificate ) (विभागेन स्वायत्तीकरिष्यते)।

(v) चत्वारि सत्यापितानि सद्य आवक्षश्छायाचित्राणि (Four attested recent passport size photographs )।

(vi) अनुसूचितजाति:/ अनुसूचितजनजाति: (**SC/ST**) **चेत्** तद्विषयकं मूलप्रमाणपत्रम् ।

(vii) जन्मदिनाङ्कसूचकमूलप्रमाणपत्रम् ।

(viii) अङ्गवैकल्यम् / क्रीडा इत्यादिसम्बन्धि किञ्चित् स्यात् चेत् तस्य मूलप्रमाणपत्रम् ।

(ix) नामाङ्कनार्थं धनराशि: केवलं धनागारीय-धनपत्रद्वारा प्रदातव्य:। (by Account Payee Bank Draft only)

(x) प्रव्रजनमूलप्रमाणपत्रम् । (Migration Certificate in original)

(xi) आधारप्रमाणपत्रष्य सत्यापितप्रतिलिपि: । (Aadhar card Xerox copy)

(xii) Anti ragging Affidavit (By Father & Student Separately ).

**5.** विभागेषु स्थानसंख्यामधिकृत्य प्रवेशो दीयते।

**6.** नात्र कश्चन / काचन अधिकारं प्रकटय्य नामाङ्कनं कर्त्तुमिच्छेत् ।

## 7. पाठ्यक्रम : (Course of Studies)

तत्र सत्रं षाण्मासिकं भवति । आचार्यपरीक्षा वर्षद्वयात्मिका । प्रतिषण्मासम् एकं सत्रम् । एवं वर्षद्वये आहत्य चत्वारि सत्राणि। तत्र विंशतिपत्रेषु द्विसहस्राङ्कानां कृते पाठ्यक्रमो निर्द्धारित:। प्रतिपत्रं पञ्चपत्रकं भविता । प्रतिसत्रान्तं विश्वविद्यालयीया परीक्षा भविष्यति । प्रतिपत्रम् उत्तीर्णाङ्का: त्रिंशत्परिमिता (30% marks) । सत्रीयपरीक्षामुत्तर्त्तुं सम्मिल्य (in aggregate)पत्रपञ्चके प्रतिशतं षट्त्रिंशत्परिमिता: (36%) अङ्का: आवश्यिका: । अनुत्तीर्णपत्रस्य परीक्षा पुन: तत्सम्बन्धिसत्रे एव दातुं शक्यते । प्रथमसत्रे यस्मिन् पत्रे अनुत्तीर्ण: तत्पत्रस्य परीक्षां तृतीयसत्रे, द्वितीयसत्रे च अनुत्तीर्ण: तत्पत्रस्य परीक्षां चतुर्थसत्रे पुन: प्रदातुमर्ह: इत्यर्थ:। एवमेव तृतीयसत्रे अनुत्तीर्ण: तत्परवर्त्तिप्रथमसत्रे तृतीयवर्षे इति,चतुर्थसत्रे अनुत्तीर्ण: तत्परवर्त्तिद्वितीयसत्रे (तस्य) तृतीयवर्षे पुन: प्रदातुमर्ह: स्यात्।

**8.** प्रतिपत्रं परीक्षां दातुं स:/सा वा अर्ह (र्हा) भवेत् यस्य /यस्या: प्रतिमासम् अध्यापितानां कालांशानां प्रतिशतं पञ्चसप्ततिकालांशेषु (75%) उपस्तिति: भवेत् ।

## 9. पञ्जिकरणम् (Registration)

सत्रीयपरीक्षार्थमावेदनसमये विश्वविद्यालयस्य पञ्जिकरणसंख्या उल्लेख्या । अन्यथा परीक्षां दातुं नार्हेत् ।द्वि

## 10. इतरविषयककार्यकलाप: (Extra –Curricular Activities)

स्नातकोत्तरविभागेषु जातीयसेवायोायामेको वर्गो वर्त्तते यत्र छात्राः भागं ग्रहीतुं शक्नुयुः।

## 11. संरक्षणम् (Reservation)

(क) प्रतिविभागं समुदायस्थानसंख्यातः अनुसूचितजातीनां (SC) कृते प्रतिशतं षोडशदशमलव-द्वि-पञ्च (16.25%) अनुसूचितजनजातीनां (ST) कृते प्रतिशतं द्वाविंशतिदशमलव-पञ्च (22.5%) स्थानानि संरक्षितानि सन्ति ।

(ख) यदि एतद्वर्गाणां प्रार्थी /प्रार्थिनी न लभ्यते तर्हि साधारणवर्गीयप्रार्थिना (न्या) रिक्तं स्थानं पूरयिष्यते ।

(ग) अङ्गवैकल्यग्रस्तछात्राणां कृते प्रतिशतं पञ्चस्थानानि (5%) संरक्षितानि सन्ति ।

(घ) सेवानिवृत्तानां सेवारतानां च सैनिकानां कृते तत्सन्ततेश्च कृते एकप्रतिशतं (1%) स्थानं संरक्ष्यते ।

(ङ) एतदतिरिक्तं सर्वकारस्य निर्देशानुसारं संरक्षणं प्रयास्यो ।

## 12. नामाङ्कनार्थं गुरुत्वप्रदानं विशेषविचारश्च (Weight age for Admission)

क्रीडाकृताम् आन्तर्जातीयस्तरे जातीयस्तरे राज्यस्तरे विश्वविद्यालयस्तरे च गृहीतभागानां कृते राज्यसर्वकारस्य नियमानुसारं गुरुत्वं प्रदीयते ।

संरक्षणविषये गुरुत्वविषये च प्रार्थिभिः तत्तद्सम्बन्धाधिकारिभ्यः सन्तोषावहमसन्दिग्धञ्च मूलप्रमाणपत्रमानीय स्वावेदनपत्रेण साकं संयोज्य प्रेषितञ्चेत् तद् विचार्यं नान्यथा ।

## 13. छात्रवृत्ति: (Scholarship)

(क) त्रिशतरूप्यकात्मिका विश्वविद्यालयछात्रवृत्तिः भवति । केवलं शिक्षागतयोग्यताभित्या प्रतिमासं दीयते ।

(ख) सर्वकारस्य सर्वाः छात्रवृत्तियोजनाः अस्य विश्वविद्यालयस्य छात्राणां कृतेऽपि उपयुज्यते ।

(ग) छात्रवृत्तिलब्धये प्रतिमासम् अध्यापितानां कालांशानां प्रतिशतं पञ्चसप्ततिकालांशेषु (75%) उपस्थितिः अपेक्षते ।

(घ) कस्यचिदत्यन्तदुर्व्यवहारजनितस्य खेदस्य हेतोः विश्वविद्यालयः स्वविचारेण येषां केषाञ्चन मासानामथवा स्थायित्वेन पूर्णतया छात्रवृत्तिं स्थगयितुमधिकारी वर्त्तते ।

(ङ) छात्रवृत्तिप्राप्तये विभागाध्यक्षाः स्वविभागीयछात्राणां शिक्षायोग्यताभित्या नामक्रमसूचीं निर्माय स्नातकोत्तरपरिषदध्यक्षमाध्यमेन कुलपतीनां कृते प्रेषयिष्यन्ति । कुलपतयः छात्रवृत्तिदानाय विश्वविद्यालयद्वारा स्थिरीकृतां छात्रवृत्तिसंख्यां विचार्य शिक्षायोग्यताभित्या निर्मितां क्रमसूचीमनुमंस्यन्ते ।

## 14. देयम् (Fees)

(क) नामाङ्कनसमये प्रत्येकं छात्रः(त्रा) वक्ष्यमाणं देयमवश्यं दद्यात् ।

<u>प्रवेशकालीनदेयम् (Fees at the time of admission)</u>

| | | |
|---|---|---|
| (i) | नामाङ्कनदेयम् (Admission Fee) | Rs. 20/- |
| (ii) | परिचयपत्रदेयम् (Cost of Identity Card) | Rs. 14/- |
| (iii) | पत्रिकादेयम् (Magazine Fee) | Rs. 20/- |
| (iv) | सत्रदेयम् (Session Fee) | Rs. 20/- |
| (v) | वार्षिकोत्सवदेयम् (Annual Function Fee) | Rs. 20/- |
| (vi) | क्रीडादेयम् (Athletic Fee) | Rs. 20/- |
| (vii) | चर्चासत्रदेयम् (Seminar Fee) | Rs. 20/- |
| (viii) | नाट्योत्सवदेयम् (Dramatic Function Fee) | Rs. 20/- |
| (ix) | पूजादेयम् (Puja Subscription Fee) | Rs. 20/- |
| (x) | छात्रपरिषद्देयम् (Union Fee) | Rs. 40/- |
| (xi) | हानिपूरकदेयम् (Insurance Fee) | Rs. 07/- |
| (xii) | पञ्जीकरणदेयम् (Registration Fee) | Rs. 40/- |
| (xiii) | सांस्कृतिकदेयम् (Cultural Fee) | Rs. 100/- |
| (xiv) | सामाजिकसेवादेयम् (Social Service Fee) | Rs. 20/- |
| (xv) | पुस्तकागारसावधानीयदेयम् (प्रत्यावर्त्तनीयम्) (Library Caution Money)(Refundable) | Rs. 50/- |
| (xvi) | विभागीयपुस्तकागारोन्नयनदेयम् | Rs. 50/- |
| (xvii) | पुस्तकागारोन्नयनदेयम् | Rs. 100/- |
| | Total | Rs. 581/- |

**(ख) मासिकं देयम्**

| | | | |
|---|---|---|---|
| (i) | शिक्षणदेयम् (Tuition Fee) | Rs. 5/-x12 | Rs. 60/- |
| (ii) | साधारणकक्षादेयम् (Common Room Fee) | Rs.2/-x12 | Rs. 24/- |
| | **Grand Total =** | | **Rs. 665/-** |

(ग) नामाङ्कनार्थमनुसूचितजातीनामनुसूचीतजनजातिनामावेदकानां कृते केबलं पुस्तकागारसावधानी यदेयत्वेन (Library Caution Money) पञ्चशद्रूप्यकाणि (Rs. 50/-)प्रदयानि ।

## 15. छात्रावास : (Hostel)

(क) छात्राणां (पुरुषाणां महिलानां च) कृते छात्रावासव्यवस्था वर्त्तते ।

(ख) संरक्षणव्यवस्था छात्रावासे नामाङ्कनार्थमपि अनुस्रियते ।

(ग) छात्रावासे नामाङ्कनं प्रस्तुतस्य वर्यताक्रमानुसारं भवति ।

(घ) नात्र कश्चन/काचन अधिकारं प्रकटय्य नामाङ्कनं कर्त्तुमर्हेत् ।

(ङ) छात्रावासे नामाङ्कनार्थमावेदनपत्रंसंपृक्तछात्रावासकार्यालयाल्लब्धुं शक्यते ।

(च) विश्वविद्यालयेन छात्रावासीयाचारव्यवहारविषयकमार्गदर्शिका प्रस्तुता वर्त्तते यदाधारेण प्रत्येकमन्तेवासी/अन्तेवासिनी मिथः अनुशासनमवलम्ब्य तिष्ठेत् ।

(छ) विश्वविद्यालयेन छात्रावासावासार्थं देयं निश्चीयते ।

(ज) समुचिताधिकारिणः पूर्वानुमतिं न गृहीत्वा न कोऽपि अन्तेवासी काऽपि अन्तेवासिनी वा छात्रावासे कञ्चन /काञ्चन अतिथिं वासयेत् ।

**अध्यक्षः**

**स्नातकोत्तरपरिषदः ।**

**श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,**

**श्रीविहारः, पुरी , 752003, ओडिशा ।**